Shri Raghunath Temple MSS. Library,
JAMMU

No. १५५६

Title लक्षण विचार:

Author श्री कवीन्द्र:

Extent १ Age

Subject न्यायशास्त्रं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

लक्षणविचारः

१५५६

१५०

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ॐ श्रीगणेशाय नमः । लक्षणा चैवं शक्यसम्बन्ध इति मूलम् । तस्यायमाशयः । तद्धर्मावच्छिन्नप्रतिपत्तिके: पदज्ञानत्वेनैव हेतुत्वम् । तथा च गङ्गायां घोषः इत्यत्र गङ्गापदस्य तीरे शाब्दबोधे सम्भवात् कथं
गङ्गापदात्तीरधीस्तत्राह लक्षणाहतिः कथ्यते सा च शक्यादशक्योपस्थितिः सैव शाब्दधीकारणम् अत एव लाक्षणिकस्यानुभावकमिति सङ्गच्छते पदज्ञानस्य स्वजन्योपस्थितिसम्बन्धेन शाब्दबोधे प्रति हेतु
त्वम् । तत्र गङ्गापदजन्योपस्थितेस्तादृशबोधाजनकत्वात्तदंशे तादृशसम्बन्धेन पदज्ञानस्याविरहाभावः न च तद्धर्मावच्छिन्नेऽशक्तिग्रहवज्जन्यपदार्थोपस्थितेरेव तत्र कथं तीरस्योपस्थितिर्न स्यादि
शशाब्दबोधं प्रति वाच्यम् तस्य च तत्तत्पदनिरूपितशक्तिज्ञानजन्यतद्धर्मावच्छिन्नप्रतिपत्तिपदनिरूपितशक्तिज्ञानत्वेनैव हेतुत्वम् तादृशलक्षणाजन्यशाब्दबोधावच्छिन्नप्रतितादृशस्वरूपसम्बन्धार्थोपस्थि
तित्वेन हेतुत्वं वक्तव्यं तन्निरूढहेतुहेतुमद्भावः सांप्रदायिकानां शक्यसम्बन्ध एव लक्षणा अत एव लक्ष्यतावच्छेदके लक्षणा नास्तीति प्राचां प्रवादोऽपि सार्थो यतः अन्यथोपस्थितेर्लक्षणात्वेन तस्योपस्थिते
लक्ष्यतावच्छेदकलक्ष्यविषयत्वाल्लक्ष्यतावच्छेदकेऽपि तादृशोपस्थितिसत्त्वाल्लक्ष्यतावच्छेदके लक्षणा नास्तीति प्रवादो व्याहन्येत अस्मन्मते गङ्गायामिवाशेषशक्यसम्बन्धस्य लक्षणात्वेन तस्य तीरत्वादावसम्भवात्
तादृशप्रवादसङ्गमः यत्र च लक्ष्यतावच्छेदके लक्ष्यसाधारणशक्यसम्बन्धसत्त्वे लक्ष्यमात्रवृत्तिनियामकसम्बन्धेन न स्वलक्षणात्वम् अथ तन्मतेऽपि तत्त्वपुरस्कारेण जन्यपदार्थोपस्थितिसम्बन्धेन लाक्षणि
कपदस्यानुभावकत्वसम्भवाल्लाक्षणिकत्वम् अथ तन्मतेऽपि तस्य कमननुभावकत्वमिति सिद्धान्तभङ्गप्रसङ्गः शक्यादशक्योपस्थितिर्लक्षणेति मते लाक्षणिकार्थस्य तदस्यतयाभानात् तन्न क्षोदक्षमम्
भवजनकत्वमिति चेत्सत्यम् लाक्षणिकमननुभावकमित्यस्योद्देश्यविधेयभावतयाऽननुभावकत्वेनान्वयात् उद्देश्यविधेयभावेनान्वयं प्रति शक्तिमत्त्वस्यैव नियामकत्वात् अत एव लक्षणाजन्यशाब्दबोधेन श
क्रियहस्य हेतुत्वप्रसङ्गः लक्षणाज्ञानेन विधेयतयाभाने नियामकमिति अत एव विधेयनपरः शाब्दार्थस्य विधेयार्थे लक्षणा नास्तीति बीजं विधेयांशस्य विधेयतया भाने नियामकत्वादिति मिश्राः परिव
लाक्षणिकस्य तेन तदस्यतयाभानं न तु लाक्षणिकार्थस्य शाब्दधीविषयतापीति मतं तथापि न क्षतिः मन्मतेऽपि लाक्षणिकार्थस्य तदस्यतयैव भानात् तादृशतदस्यभाने प्रतिबन्धकं लक्षणाहतिग्रहस्यादेव
त्वम् तदस्यतयाभाने तु तज्ज्ञानविशेष्यतया प्रकारतया वाभानमिति सा प्रकारता विशेष्यता वा न विषयतात्मिकाज्ञानाविषयीभूतेत्वात् प्रकारत्वादिकं तिष्ठतीति वदन्ति वस्तुतो लक्ष्यतावच्छेदके लक्षणा
नास्तीत्यस्यायमभिप्रायः लक्ष्यतावच्छेदकविशिष्टशक्यसम्बन्धरूपलक्षणाग्रहोऽपेक्षितो न तु लक्ष्यतावच्छेदके तादृशसम्बन्धग्रहोऽपेक्षितः तदनिष्ठशक्यतावच्छेदकविशिष्टशक्ये शीघ्रं शक्यतावच्छेदकधर्मे
विशेषणविधया शक्तिज्ञानमपेक्षितमिति अत एव लक्ष्यतावच्छेदकसाधारणसम्बन्धेन लक्ष्यतावच्छेदके न तादृशग्रहोऽपेक्षितः यदि च लक्ष्यमात्रवृत्तिविषयतासम्बन्धेन लक्षणाप्रयोजकत्वमात्रसम्भवे
न लक्ष्यतावच्छेदकसाधारणविषयोपस्थितेर्लक्ष्यतावच्छेदके यथाकथञ्चित्सम्बन्धेन सत्त्वेऽपि न तत्तिरिक्तिविभाज्यत्वेन तथापि प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेर्गङ्गायां घोष इत्यत्र लाक्षणिकार्थ
तीरे विभक्त्यर्थान्वयानुपपत्तेः शक्यादशक्योपस्थितिर्लक्षणेति मते तत्प्रकारस्यैव प्रकृत्यर्थत्वात् न च प्रकृतिप्रयोज्यत्वपदार्थोपस्थितेर्नियामकत्वं प्रकृतिजन्यत्वे तत्समवायान्तरवाक्यार्थत्वात् तत्प्र
कृतिप्रयोज्यत्ववदर्थबोधानुपपत्तेरिति वाच्यम् प्रकृतिजन्यतज्जन्यसाधारणप्रयोज्यत्वस्यैकस्यालाभात् अस्माकं मते महावाक्यार्थबोधस्य वाक्यान्तरवाक्यार्थबोधस्याहेतुत्वात् अवान्तरवाक्यार्थक्रमेण
न महावाक्यार्थधीः किन्त्वप्रथमनवपदरवाच्यघोभाव उपकुम्भमित्यादौ प्रकृत्यर्थविशेष उपपदार्थसामीप्यविशिष्टे प्रत्ययार्थस्यान्वयदर्शनात् एवं च दधिपयसी इत्यादावपि प्रकृत्यर्थभिन्ने स्वपदार्थे विभ
क्त्यर्थस्यानुपदर्शनात् संयोगो ब्रीहिरित्यत्र चैकत्वलक्षणाविभक्त्यर्थस्य चन्द्रादित्वलक्षणपदार्थतावच्छेदके न यदर्शनात् तथा व्युत्पत्तिरिति वाच्यम् तत्र लक्षणैव तादृशव्युत्पत्तेरादरः न चैकत्र सङ्को
चकल्पने सर्वत्र तस्य सङ्कोचः प्रमाणाभावात् शक्तिलक्षणयोरन्यतरत्वेनैव हेतुत्वं किं त्वेकरूपेण तथा हि शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्रकारतानिरूपितार्थविशेष्यता
कग्रहत्वेनैव हेतुत्वम् इत्थं च यत्र केवलशक्तिसम्बन्धेन पदप्रकारकं ज्ञानं भवति तत्रापि तादृशज्ञानस्य विद्यमानत्वान्न दोषः अत्र च नव्यानि विशेष्यतेः शक्तिनिष्ठावच्छेदकताया पर्याप्तिः तेनैव लक्षणाज्ञानस्य सङ्ग्र
हः शक्यशक्यसम्बन्धेनैव पदप्रकारकज्ञानेन शक्तित्वावच्छिन्नसांसर्गिकविषयताशालित्वक्सम्बन्धेन पदाभाववत्तानिश्चयोत्तरमपि शक्यसम्बन्धेन पदार्थप्रकारकं ज्ञानं जायते तत्सम्बन्धेनैव
दशाववत्त्वनिश्चयस्य तत्सम्बन्धनिष्ठसांसर्गिकविषयताशालितत्प्रकारताकं प्रति प्रतिबन्धकत्वादिति चेत् सत्यम् यादृशसम्बन्धावच्छिन्नसांसर्गिकविषयतानिरूपितयादृशप्रकारतानिरूपितविशि
ष्टविशेष्यताकग्रहस्तिष्ठति तादृशपदनिष्ठतादृशप्रकारतानिरूपिततादृशपदार्थनिष्ठविशेष्यतानिरूपिततादृशसांसर्गिकविषयताशालिग्रहो न जायते इत्थं च तत्तद्वैप्रतिबन्धकभावः तथा च
पदनिष्ठप्रकारतानिरूपिता यार्थनिष्ठविशेष्यतानिरूपिता या शक्तिनिष्ठसांसर्गिकविषयता तत्कालीनं ज्ञानं प्रति शक्यावच्छिन्नप्रतियोगिताकपदाभाववन्निष्ठप्रकारतानिरूपितार्थनिष्ठविशेष्यताकज्ञान
स्य प्रतिबन्धकत्वानुपपत्तिः तादृशी शक्तिनिष्ठा या सांसर्गिकी विषयता सा न पदनिष्ठप्रकारतानिरूपिता सती अर्थनिष्ठविशेष्यतानिरूपिता शक्तिनिष्ठविषयतानिरूपिता पदनिष्ठप्रकारतानिरू
पिता न भवति किं तु नार्थनिष्ठविशेष्यतानिरूपितेति वस्तुतः यदि च शक्यसम्बन्धाभावसम्बन्धेन पदप्रकारकार्थविशेष्यताकज्ञानानान शक्याभावसम्बन्धेन पदप्रकारकार्थविशेष्यताकज्ञानान्न शाब्द

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ल॰ वि॰

धीस्वरूपप्रतियोगितावच्छेदकतावच्छिन्नसांसर्गिकविषयतावच्छेदकताकपदप्रकारताया आशाकाशेदसम्बन्धावारणं तत्तादृशविषयताभेदनिवेशादिति अथवार्थनिष्ठविशेष्यतानिरूपिता
या सांसर्गिकविषयता तन्निरूपितात्वसम्बन्धावच्छिन्ना अर्थनिष्ठसांसर्गिकविषयता तद्भिन्नविषयता या आनिरूपिता या कि निष्ठसांसर्गिकविषयता तन्निरूपिता यापद निष्ठप्रकारता तन्निरूपितार्थनिष्ठ
विशेष्यताशालिज्ञानशक्तिज्ञानत्वेन हेतुत्वम् अतः शक्तिकुण्डलीनत्वशक्तिताद्रात्म्यादिसंसर्गेण पदप्रकारकज्ञानस्यानिरासः सम्भवः न च शक्यतानिरूपितपरम्परासम्बन्धरूपलक्षणासम्बन्धेन पदप्रकारक
ज्ञानस्यासङ्ग्रह इति वाच्यम् तादृशज्ञानस्यस्वातन्त्र्येण हेतुत्वात् अप्रामाण्यग्रहाभावविशिष्टत्वादिनिवेशप्रयुक्तानुपपत्तिस्तु व्याप्यविशेष्यकपरामर्शपक्षविशेष्यकपरामर्शयोरनुगमप्रसङ्गेन दर्शि
तरीत्यानिवारणीयेति एवं लक्षितलक्षणापि स्फुटैवेति मूलम् ॥ तस्यायमाशयः द्विरेफपदस्य भ्रमरपदघटितत्वेन द्विरेफपदात् भ्रमरपदस्योपस्थितिः ततो लक्षितलक्षणा तादृशपदशक्यसम्बन्धित्वं
तादृशभ्रमरपदशक्यार्थः अथ द्विरेफपदस्य लक्षणा या चेष्टानत्वभ्रमरपदस्य तच्छक्यत्वेन भ्रमरपदार्थस्य शाब्दबोधसम्भवेऽपि लक्षितलक्षणयेति चेत् सत्यम् भ्रमरपदस्य शक्यार्थशाब्दबोधस्वतन्त्रतया तत्र तथा
सति द्विरेफस्य तत्र भ्रमरविभक्त्यर्थान्वयप्रसङ्गात् न ह्यत्र भ्रमरपदं प्रकृतिः किन्तु द्विरेफपदमेव तादृशपदार्थत्वाभावे कथं विभक्त्यर्थान्वयः शक्तिप्रयुक्तिः अन्यलक्षणाव लक्षितलक्षणा इत्यस्य तत्समीपतया
समिता कारस्य केवलं द्विरेफपदस्य तादृशपदार्थवाचकत्वाभावे तत्र कथं विभक्त्यर्थस्यान्वय इति लक्षणायैव तत्र भ्रमरशाब्दबोधसम्बन्धेन कुतो लक्षितलक्षणायेत्याह इत्थं च तद्घाचकपदघटितत्वं
व लक्षितलक्षणापदार्थः शक्यसम्बन्धमात्रस्य लक्षणात्वेन तादृशपदघटितशक्यसम्बन्धत्वस्य लक्षणात्वेनस्यापि सत्त्वं च न च यत्र द्विरेफपदशक्यसम्बन्धग्रहो न जातो भ्रमरे किं तु द्विरेफपदलक्षणा
पूर्वस्थितस्य भ्रमरपदस्यैव लक्ष्यसम्बन्धग्रहो जातस्तत्र का गतिः लक्षितलक्षणा वा इत्थं तादृशलक्षणा नाम हन्ति अत्र हादेव शाब्दबोध इति चेत् सत्यम् तत्र भ्रमरस्यापि द्विरेफपदार्थत्वाभावे तत्र विभक्त्य
र्थान्वयोऽनुपपत्तिः अन्यथा तत्रान्वयबोधो मास्त्वेव न च तत्र एव तत्र लक्षितलक्षणानाम कुतस्तत्रसमाद्रियते लक्षणा अस्मृतपदस्यापि तत्पदस्त्वेन लक्षितलक्षणेति वाच्यम् शक्यादेवेतरूपेण ज्ञानेन
व नितलक्षणेति भ्रमरपदशक्यतावच्छेदकस्य भ्रमरत्वस्य तत्पदलक्ष्यतावच्छेदकत्वासम्भवादिति तत्र तादृशपदघटितत्वाक्यसम्बन्धग्रहे बाधकाभावात् तादृशपदस्यापि सम्भवात् तत्र तादृशप
दघटितसम्बन्धेन द्विरेफपदस्य बाधनिश्चयोऽस्ति भ्रमरे तत्र का गतिरिति वाच्यम् एतावता लक्षणाप्रकारकज्ञानकारणसम्भवे लक्षणासंसर्गकज्ञानकारणासम्भवात् न च एवं तन्मते तन्निप्रकारक
ज्ञानत्वेन हेतुत्वमिति वाच्यम् एतावता बाधकत्वात् एवं तन्निप्रकारकज्ञानस्यैव हेतुसांसर्गिकविषयतानात्वेन हेतुत्वमस्तु एवमिति वाच्यम् एतेन शक्यतावच्छेदकप्रकारेण लक्षणानास्तीति प्रवादस्य
वैयर्थ्यमेवबीजम् तत्रकृतेऽवशाब्दधीसम्भवे न कुतो लक्षणाकल्पनयेति अत्र तादृशपदशक्यतावच्छेदकरूपेण लक्षणानङ्गीकारेण प्रत्यक्षसिद्धत्वान्न प्रवत्तत्र तत्सम्भवनीयगत्येव तत्र शक्तिकल्पने
विपरीतम् सर्वत्र लक्षणोच्छित्तिसम्भवे कुतमतिरिक्तशक्तिकल्पने नेति अत्र विभक्तौ न लक्षणा स देनाग्निर्लक्षणा वा दिवा को न लक्षणा लक्ष्यतावच्छेदकेन लक्षणा शक्येन लक्षणा विशिष्टवा
चकपदस्य विशेषणमपहाय केवलविशेष्यवाचकधर्मप्रकारकबोधजनकेन लक्षणा तृविधौ लक्षणा विधेयार्थलक्षणेति प्रवादः तत्र लक्षणाज्ञानजन्यशाब्दबोधे शक्तिज्ञानहेतुत्वेऽत्र सङ्गत्वे वा
मिवास्कारणाय शक्तिज्ञानकार्यतावच्छेदकविधेयमात्रालिशाब्दबोधो भवितुमर्हतीति तत्र लक्षणा उद्देश्यविधेयभावविशिष्टयान्वयजनकपरत्वेनैवकाश्यः एवं विशिष्टवाचकपदस्य शक्यता
वच्छेदकीभूतविशेषणहितधर्मशक्तिताशादेवशाब्दधीसम्भवे कुतो तत्र लक्षणाङ्गीकारेण यथा बलवदनिष्टाननुबन्धीष्टसाधनत्ववाचकविधेः श्येनेनाभिचरन्यजेतेत्यादौ केवलबलवदनि
ष्टाननुबन्धित्वमपहायेष्टसाधनत्वबोधकत्वम् न च तत्र तादृशविशिष्टक्रियस्य तादृशविशिष्टसाधनताहृत्वकार्यतावच्छेदकत्वकथं केवलेष्टसाधनत्वस्य शाब्दबोधः यदि च इष्टसाधनत्वस्य
शाब्दबोधः यदि च इष्टसाधनत्वप्रकारकशाब्दत्वमेव तत्र किं कृतापि बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वबोधोमा जनि इति वाच्यम् यथाभिमतिनेष्टसाधनत्वावैकिन्नप्रकारकशाब्दत्वका
र्यतावच्छेदकम् तथा च कचिद्विशिष्टेष्टसाधनत्वस्य बोधः कचिद्वेष्टसाधनत्वस्येति न च बलवदनिष्टाननुबन्धित्वकार्यतावच्छेदककुत्सनिवेशोऽयपादाने त्वाधस्तथा प्रमेयवत्तादौ दीनां कुण्डनेवा
धः योग्यताज्ञानादेरविशिष्टत्वादिति वाच्यम् योग्यताज्ञानेन तद्वितरधर्मस्य बोधजननेन तत्कृतो विशिष्टस्य विशेषसामग्रीतादहेतोः एवं शक्यतावच्छेदकरूपेणाप्यत्र लक्षणेति निश्चयेऽपि चेष्टावशाद्
वशाद्धेव शक्योऽलक्षणानास्तीति अत एव शक्यतावच्छेदकभिन्नरूपेण लक्षणानास्तीति शक्यतावच्छेदकरूपेणेति निरासः ॥ इति श्रीकवीन्द्रकृतलक्षणविचारोऽयम् ॥ ओम् ॥ ओम् ॥

× उद्देश्यविधेयभावेनान्वयबोधो न लक्षणयेति सिद्धान्तः साधुसङ्गच्छते एवं लाक्षणिकेनानुभावकमिति प्रवादोपि ×७

नं॰ २५४८ पत्रे ९

CC-0 Dharmartha Trust J&K. An eGangotri Initiative